# Himalayakritam 2 Shiva Stotram

# हिमालयकृतं २ शिवस्तोत्रम्

## Document Information

Text title : Himalayakritam 2 Shiva Stotram

File name : himAlayakRRitaM2shivastotram.itx

Category : shiva, shivapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : shivapurANa | rudrasaMhitA | pArvatIkhaNDa | adhyAya 11/12-20||

Latest update : November 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 19, 2024

*sanskritdocuments.org*

# हिमालयकृतं २ शिवस्तोत्रम्

हिमालय उवाच ।
देवदेव महादेव कपर्दिन् शङ्कर प्रभो ।
त्वयैव लोकनाथेन पालितं भुवनत्रयम् ॥ १२॥

नमस्ते देवदेवेश योगिरूपधराय च ।
निर्गुणाय नमस्तुभ्यं सगुणाय विहारिणे ॥ १३॥

कैलासवासिने शम्भो सर्वलोकाटनाय च ।
नमस्ते परमेशाय लीलाकाराय शूलिने ॥ १४॥

परिपूर्णगुणाधानविकाररहिताय ते ।
नमोऽनीहाय वीहाय धीराय परमात्मने ॥ १५॥

अबहिर्भोगकाराय जनवत्सल ते नमः ।
त्रिगुणाधीश मायेश ब्रह्मणे परमात्मने ॥ १६॥

विष्णुब्रह्मादिसेव्याय विष्णुब्रह्मस्वरूपिणे ।
विष्णुब्रह्मकदात्रे ते भक्तप्रिय नमोऽस्तु ते ॥ १७॥

तपोरत तपस्थानसुतपःफलदायिने ।
तपःप्रियाय शान्ताय नमस्ते ब्रह्मरूपिणे ॥ १८॥

व्यवहारकरायैव लोकाचारकराय ते ।
सगुणाय परेशाय नमोऽस्तु परमात्मने ॥ १९॥

लीला तव महेशानावेद्या साधुसुखप्रदा ।
भक्ताधीनस्वरूपोऽसि भक्तवश्यो हि कर्मकृत् ॥ ३.११.२०॥

मम भाग्योदयादत्र त्वमागत इह प्रभो ।
सनाथ कृतवान्मां त्वं वर्णितो दानवत्सलः ॥ २१॥

अद्य मे सफलं जन्म सफलं जीवनं मम ।

अद्य मे सफलं सर्वं यदत्र त्वं समागतः ॥ २२॥

ज्ञात्वा मां दासमव्यग्रमाज्ञान्देहि महेश्वर ।
त्वत्सेवां च महाप्रीत्या कुर्यामहमनन्यधीः ॥ २३॥

इति शिवपुराणे रुद्रसंहितायां पार्वतीखण्डे एकादशाध्यायान्तर्गतं
हिमालयकृतं शिवस्तोत्रं समाप्तम् ।

शिवपुराण । रुद्रसंहिता । पार्वतीखण्ड । अध्याय ११/१२-२०॥

shivapurANa . rudrasaMhitA . pArvatIkhaNDa . adhyAya 11/12-20..

Proofread by PSA Easwaran

*Himalayakritam 2 Shiva Stotram*

pdf was typeset on November 19, 2024

Please send corrections to *sanskrit@cheerful.com*